# सर्वकारीयसंस्कृतमहाविद्यालयः त्रिप्पूणित्तुरा

# 1914 तमे क्रिस्त्वब्दे स्थापितम्

## सरलमानकसंस्कृतस्य क्रियान्वयनाय संस्थायाः व्यूहः

**सर्वकारीयसंस्कृतमहाविद्यालयस्य दूरदृष्टिपत्रम्**

- छात्रान् पण्डितान् परिष्कृतान् च विधातुम् संस्कृतस्य विकासः ऊर्ज्जीकरणम् च।

अस्माकं ध्येयम्

- संस्कृतम् भारतीयमूल्यानि च अवगन्तुम् विशालस्य शैक्षणिकसमाजस्य प्राप्तिः यथा भवेत् ।
- प्रधानांशेषु परिष्करणं समकालिकत्वसम्पादनम् च सुनिश्चितं यथा भवेत् ।
- नूतनानुसन्धानस्य सुचिन्तनस्य च प्रोत्साहनं यथा भवेत् ।
- प्रयोगकुशलस्य छात्रसमाजस्य निर्मितिः यथा भवेत् ।
- जनसम्पर्केण विस्तारीकरणप्रवर्तनेन च समाजः प्रबोधितः यथा भवेत् ।
- संस्कृतविनिमये समुचितशैक्षणिकोपकरणानामुपयोगः यथा भवेत् ।
  तथा च अपेक्षानुसारं संस्कृतस्य प्रचाराय महाविद्यालयानुबद्धविभागेषु सरलमानकसंस्कतस्य उपयोगः परिपोषणीयः इत्यस्ति संस्थायाः सङ्कल्पः। एतदर्थं शैक्षणिककार्यक्रमेषु सास्कतिककार्यक्रमेषु तथा परिसरे च सरलं मानकं च संस्कृतं भाषितं यथा भवेत् तदर्थं संस्थया प्रयत्नो विधेयः।